## ७. ज्यौतिषिकस्य दिनम् ।

**I एकवाक्येन संस्कृतभाषया उत्तरं लिखत ।**

1. कार्यक्षेत्रम् आसाद्य ज्यौतिषिकः किम् उद्घाटयति ? (K)
2. ज्यौतिषिकः कुत्र उपविश्य ग्राहकान् प्रतीक्षते ? (K)
3. चणकान् क्रेतुं कः जनान् प्रबोधयति ? (K)
4. जनाः कस्य वचनैः तुष्यन्ति ? (K)
5. ज्यौतिषिकः ग्रामं परित्यज्य कुत्र आगतवान् ? (K)
6. कुत्र अन्धकारः आवृतः ? (K)
7. पथिकः किमर्थं वृक्षमूलम् उपागतः ? (K)
8. ज्यौतिषिकः कस्य हस्तनिगडेन बद्धः ? (K)
9. पथिकस्य नामधेयं किं ? (K)
10. ज्यौतिषिकः कुत्र शयनमकरोत् ? (K)

**II दशवाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।**

1. ज्यौतिषिकस्य पूर्वजीवनवृत्तान्तः । (A)
2. ज्यौतिषिकस्य समयप्रज्ञा । (A)
3. ज्यौतिषिक-गुरुनायकयोः संवादः । (A)
4. ज्यौतिषिकस्य दिनम् इति पाठस्य सारांशं लिखत । (A)

**III पाठनाम उल्लिख्य कः कं प्रति अवदत् इति संस्कृतभाषया लिखत ।**

1. अत्यन्तं श्रान्तोऽसि । (C)
2. भवतः भाग्यरेखा...........। (C)
3. किञ्चित् विशेषं वद । (C)
4. मां साग्रहं आहूतवान् त्वम् । (C)
5. त्वया वचनं दत्वा धनं स्वीकृतं ननु । (C)
6. पूर्वं भवतः प्राणसङ्कटम् आपतितम् आसीत् । (C)
7. मम नाम कथं जानासि ? (C)
8. सः तु मम हस्तात् च्युतः। (C)
9. अद्य रात्रौ एव रेलयानेन ग्रामं प्रति प्रतिष्ठताम् । (C)
10. परन्तु सः जीवति इति अद्य ज्ञातम् । (C)
11. इदानीं तु निद्रासमयः । (C)

**IV रेखाङ्कितानि पदानि आश्रित्य प्रश्ननिर्माणं कुरुत ।**

1. <u>मार्गे</u> विविधाः आपणाः आसन् । (S)
2. <u>ज्यौतिषिकस्य</u> कार्यक्षेत्रे अन्धकारः आवृतः । (S)
3. ज्यौतिषिकः स्ववस्तूनि <u>स्यूते</u> स्थापितवान् । (S)
4. <u>क्रोधाविष्टः</u> पान्थः नेत्रयोः पुरतः करं गृहीतवान् ।(S)
5. <u>विंशति</u> रूप्यकाणि दीयन्ताम् । (S)
6. पथिकस्य मुखं <u>ज्यौतिषिकेण</u> लक्षितम् ।(S)
7. <u>छुरिकया</u> विदीर्णः आसीः त्वम् । (S)

*************************